अथ धात्रीसेचनफलम् ।
"पिता पितामहाश्चान्ये अपुत्रा ये च गोत्रिणः ।
वृक्षयोनिं गता ये च ये च कीटत्वमागताः ॥
रौरवे नरके ये च महारौरवसंज्ञके ।
वियोनिञ्च गता ये च ये च ब्रह्माण्डमध्यगाः ॥
पिशाचत्वं गता ये च ये च प्रेतत्वमागताः ॥
ते पिबन्तु मया दत्तं धात्रीमूले सदा पयः ॥
ते सर्व्वे तृप्तिमायान्तु धात्रीमूलनिषेचनात् ॥
इति धात्रीं चाभिषिच्य वारानष्टोत्तरं शतम् ।
तांश्च प्रदक्षिणीकृत्य कुर्य्याज्जागरणं व्रती ॥
जागरणन्तु प्रक्रान्तव्रतविषयम् ।" इति श्रीहरिभक्तिविलासे १३ विलासः ॥

धात्रीपत्रं, क्ली, (धात्रीपत्रमिव पत्रमस्य ।) तालीशपत्रम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।
"तालीशं शुकमप्याढ्यं धात्रीपत्रञ्च तत् स्मृतम् ॥"
धात्र्याः पत्रम् ।) आमलकीदलञ्च ॥

धात्रीपुत्रः, पुं, (धात्र्या उपमातुः पुत्रः ।) नटः । इति हेमचन्द्रः । ३।२४२ । उपमातृसुतश्च ॥

धात्रीफलं, क्ली, (धात्र्या आमलक्याः फलम् ।) आमलकी । इति जटाधरः ॥ (विवरणमामलकीशब्देऽस्य ज्ञातव्यम् ॥)

धात्रेयिका, स्त्री, (धात्रेयी+स्वार्थे कन् टाप् । पूर्ब्बह्रस्वश्च ।) धात्री । धाइ इति भाषा । यथा, तिथितत्त्वे चतुर्थीप्रकरणे ।
"पठेद्धात्रेयिकावाक्यं प्राङ्मुखो वाप्युदङ्मुखः ॥"

धात्रेयी, स्त्री, धात्रीशब्दात् स्वार्थे (ढक्) ईप्(ङीप्)-प्रत्ययेन निष्पन्ना ॥ धात्रेयिका । (यथा, देवीभागवते । २ । ६ । ३२ ।
"करे धृत्वाथ धात्रेयी तामुवाच सुलज्जिताम् ।
कां चिन्तां करभोरु ! त्वमाधत्सेऽद्य स्थिताश्रमम् ॥")

धानकं, क्ली, (धन्याकं पृषोदरादित्वात् साधुः ।) धन्याकम् । इति राजनिर्घण्टः ॥ (अस्य विषयो यथा, वाभटे चिकित्सास्थाने नवमेऽध्याये ।
"श्लेष्मातिसारवातोक्तं विशेषादामपाचनम् ।
कर्त्तव्यमनुबन्धस्य पिबेत् पक्वाग्निदीपनम् ॥
बिल्वकर्कटिकामुस्तप्राणदा विश्वभेषजम् ।
वचाविड़ङ्गभूतीकधानकामरदारु वा ॥")

धाना, स्त्री, (धीयते इति । धा+"धापवस्यज्यतिभ्यो नः ।" उणां । ३ । ६ । इति नः टाप् च ।) भृष्टयवः । धान्यकम् । (पर्य्याया यथा,
"धान्यकं धानकं धान्यं धाना धानेयकन्तथा ।
कुनटी धेनुकाच्छत्रा कुस्तुम्बुरु वितुन्नकम् ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) अभिभवः । अङ्कुरः । भिन्नः । चूर्णसक्तवः । इति मेदिनीहेमचन्द्रौ ॥

धानाः, स्त्री, (धीयन्ते इति । धा+"धापवस्यज्यतिभ्यो नः ।" उणां । ३ । ६ । इति नः टाप् च ।) भृष्टयवः । बहुवचनान्तोऽयं शब्दः । इत्यमरः । २ । ६ । ४७ ॥ (यथा, ऋग्वेदे । ३ । ३५ । ३ ।
"ग्रसेतामश्वा वि मुचेह शोणा दिवे दिवेस दृशीरद्धि धानाः ॥"
"त्वन्तु सदृशीरेकरूपान् धाना भृष्टयवान् दिवे दिवे प्रतिदिवसमद्धि भक्षय ।" इति तद्भाष्ये सायनः ।)
"यवास्तु निस्तुषा भृष्टाः स्मृता धाना इति स्त्रियाम् ।
धानाः स्युर्दुर्ज्जरा रूक्षास्तृट्प्रदा गुरवश्च ताः ॥
तथा मेदःकफच्छर्द्दिनाशन्यः संप्रकीर्त्तिताः ॥"
इति राजनिर्घण्टः ॥
("धानासंज्ञास्तु मे भक्ष्याः प्रायस्ते लेखनात्मकाः ।
शुष्कत्वात्तर्पणा चैव विष्टम्भित्वाच्च दुर्ज्जराः ॥
विरूढ़धानाः शष्कुल्यो मधुक्रोड़ाः सपिण्डकाः ।
पूपाः पूपलिकाद्याश्च गुरवः पैष्टिकाः परम् ॥"
"धाना पर्पटपूपाद्यास्तान् बुद्धा निर्द्दिशेत्तथा ॥"
इति चरके सूत्रस्थाने २७ अध्यायः ॥)

धानाकाः, स्त्री, (धाना+स्वार्थे कन् टाप् ।) धानाः । नित्यबहुवचनान्तोऽयं शब्दः । इति शब्दरत्नावली ॥

धानाचूर्णं, क्ली, (धानानां चूर्णम् ।) भृष्टयवचूर्णम् । सक्तवः । इति हेमचन्द्रः । ३ । ६५ ॥

धानी, स्त्री, (धीयते धार्य्यतेऽत्र । धा+आधारे ल्युट् । टित्वात् ङीप् ।) आधारः । यथा, मत्स्यधानी राजधानी । इत्यादि भरतः ॥ पीलुवृक्षः । इति राजनिर्घण्टः ॥

धानुष्कः, त्रि, (धनुः प्रहरणमस्येति । धनुः+तदस्य इत्यधिकृत्य "प्रहरणम् ।" ४ । ४ । ५७ । इति ठक् । यद्वा, धनुषा जीवतीति । "वेतनादिभ्यो जीवति ।" ४ । ४ । १२ । इति ठक् । "इसुसुक्तान्तात् कः ।" ७ । ३ । ५१ । इति ठस्य कः ।) धनुर्द्धरः । इत्यमरः । २ । ८ । ६९ ॥ (यथा, महाभारते । ६ । २० । १७ ।
"अश्वेऽश्वे दश धानुष्का धानुष्के दश चर्म्मिणः ।
एवं व्यूढ़ान्यनीकानि भीष्मेण तव भारत ! ॥")

धानुष्का, स्त्री, (धनुरिव अवयवोऽस्या इति ठक् टाप् च ।) अपामार्गवृक्षः । इति शब्दचन्द्रिका । (अपामार्गशब्देऽस्या विवरणं व्याख्यातम् ॥)

धानुष्यः, पुं, (धनुषि साधुरिति । धनुष्+ष्यञ् ।) वंशः । इति राजनिर्घण्टः ॥

धानेयं, क्ली, (धाना एव । स्वार्थे ढक् ।) धन्याकम् । इति राजनिर्घण्टः ॥

धानेयकं, क्ली, (धानेय+स्वार्थे कन् ।) धन्याकम् । इति जटाधरः ॥

धान्या, स्त्री, पृथ्वीका । इति शब्दचन्द्रिका ॥ एलाइच इति भाषा ॥

धान्यं, क्ली, चतुस्तिलपरिमाणम् । इति शुभङ्करः । धन्याकम् । धनीया इति यस्य भाषा । तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"धन्याकं धान्यकं धान्यं कुस्तुम्बुरुधनीयकम् ।
धन्या कुस्तुम्बुरी चान्या मेथलोमा वितुन्नकम् ॥")
परिपेलम् । (धाने पोषणे साधु इति । धान+"तत्र साधुः ।" ४ । ४ । ९८ । इति यत् । यद्वा, दधातीति । धा+"दधातेर्यन् नुट् च ।" उणां । ५ । ४८ । इति यन् नुट् च ।) सतुषतण्डुलादि । धान इति भाषा ॥ तत्पर्य्यायः । भोग्यम् २ भोगार्हम् ३ अन्नम् ४ अद्यम् ५ जीवसाधनम् ६ स्तम्बकरिः ७ व्रीहिः ८ । (यथा, ऋग्वेदे । ६ । १३ । ४ ।
"विश्वं स देव प्रति वारमग्ने धत्ते धान्यं पत्यते वसव्यैः ॥")

तत्र शूकधान्यगुणाः । त्रिदोषशमनत्वम् । तेजोबलातिशयवीर्य्यवृद्धिदातृत्वञ्च ॥ * ॥ शमीधान्यगुणाः । गुरुत्वम् । हिमत्वम् । विबन्धदातृत्वञ्च ॥*॥ तृणधान्यगुणाः । वातात्मकत्वम् । शिशिरत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ धान्यं त्रिविधम् । हेमन्तोद्भवः शालिः १ ग्रीष्मजः षष्टिकः २ प्रावृट्कालभव आशुः ३ । एतेषां गुणास्तत्तत् शब्दे द्रष्टव्याः ॥*॥ वापितधान्यगुणाः । गुरुत्वम् ॥ अवापितधान्यगुणाः । वापितधान्यगुणात् किञ्चिद्धीनः ॥ * ॥ रोप्यातिरोप्यधान्यगुणाः । लघुत्वम् । शीघ्रपाकित्वम् । गुणोत्तरत्वम् । अदाहित्वम् । दोषहरत्वम् । बल्यत्वम् । मूत्रविवर्द्धनत्वञ्च ॥ * ॥ नवं धान्यं अभिष्यन्दि । संवत्सरोषितं धान्यं लघु । संवत्सरद्वयादूर्द्ध्वं धान्यं वातप्रकोपणं रूक्षं लघुतरं पुंस्त्वघाति । शूकधान्यं शमीधान्यञ्च वत्सरादूर्द्ध्वं प्रशस्तम् । शमीधान्यं वर्षादतीतं वातकृत् रूक्षम् । अभिनवं तत्प्रायेण गुरु । नवा यवगोधूममाषतिला हिताः । पुराणा विरसा रूक्षा न तथार्थकराः ॥ अनार्त्तवं व्याधिहतं अपर्य्यागतं अभूमिजं नवञ्च धान्यं न गुणवत् ॥ अकालजातं धान्यं विरसं सर्व्वधातुप्रदूषणञ्च । इति राजवल्लभः ॥ * ॥ व्रतादौ अन्नत्यागे वर्ज्जनीयधान्यानि यथा,—
"एकादश्यां विशेषेण ह्यन्नमात्रं परित्यजेत् ।
फलं मूलं जलादीनि किञ्चिद्भक्ष्यं प्रकल्पयेत् ॥
अन्नन्तु धान्यसम्भूतं गिरिजे यदि जायते ।
धान्यानि विविधानीह जगत्यां शृणु यत्नतः ॥
श्याममाषमसूराश्च धान्यकोद्रवसर्षपाः ।
मुद्गको राजमाषाश्च तुसरो जुमरस्तथा ॥
यवगोधूममुद्गाश्च तिलकङ्गुकुलत्थकाः ।
गवेधुकाश्च नीवारा आतकश्च कलायकाः ॥
माण्डुको वज्रकोरङ्कः कोचको वड़कस्तथा ।
तिलकाश्चणकाद्याश्च धान्यानि कथितानि वै ॥
एड़कान्यसमुद्भूतमन्नं भवति शोभने ! ।
अन्नत्यागे व्रते भक्ष्यमेतदेव विवर्ज्जयेत् ॥"
इति पाद्मोत्तरखण्डम् ॥ * ॥

अथ धान्यच्छेदनदिनम् । तत्र तिथयः रिक्तातिरिक्ताः । वाराः रविशुक्रसोमबुधबृहस्पतीनाम् । नक्षत्राणि कृत्तिका भरणी अश्लेषा पूर्ब्बभाद्रपत् धनिष्ठा पूर्ब्बाषाढ़ा ज्येष्ठा चित्रा उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत् एतानि । तत्र चन्द्रः शोभनः । लग्नानि वृषसिंहवृश्चिककुम्भमिथुनतुलाकन्याधनुःपूर्ब्बार्द्ध-